শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীৱেঙ্কটেশতূণকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীৱেঙ্কটেশতূণকম্ ॥

ৱজ্রশঙ্খবাণচাপচিহ্নিতাঙ্ঘ্রিপঙ্কজং
নর্তিতাযুতারুণাগ্র্যনিস্সরৎপ্রভাকুলম্।
ৱজ্রপাণিমুখ্যলেখৱন্দিতং পরাৎপরং
সজ্জনার্চিতং ৱৃষাদ্রিসার্ৱভৌমমাশ্রযে॥ **1** ॥

পঞ্চবাণমোহনং ৱিরিঞ্চিজন্মকারণং
কাঞ্চনাম্বরোজ্জ্ৱলং সচঞ্চলাম্বুদপ্রভম্।
চঞ্চরীকসঞ্চযাভচঞ্চলালকাৱৃতং
কিঞ্চিদুদ্ধতভ্রূৱং চ ৱঞ্চকং হরিং ভজে॥ **2** ॥

মঙ্গলাধিদৈৱতং ভুজঙ্গমাঙ্গশাযিনং
সঙ্গরারিভঙ্গশৌণ্ডমঙ্গদাধিকোজ্জ্ৱলম্।
অঙ্গসঙ্গিদেহিনামভঙ্গুরার্থদাযিনং
তুঙ্গশেষশৈলভৱ্যশৃঙ্গসঙ্গিনং ভজে॥ **3** ॥

কম্বুকণ্ঠমম্বুজাতডম্বরাম্বকদ্ৱযং
শম্বরারিতাতমেনমম্বুরাশিতল্পগম্।
বম্ভরার্ভকালিভৱ্যলম্বমানমৌলিকং
শঙ্খকুন্দদন্তৱন্তমুত্তমং ভজামহে॥ **4** ॥

পঙ্কজাসনার্চতং শশাঙ্কশোভিতাননং
    কঙ্কণাদিদিৱ্যভূষণাঙ্কিতং ৱরপ্রদম্।
কুঙ্কুমাঙ্কিতোরসং সশঙ্খচক্রনন্দকং
    ৱেঙ্কটেশমিন্দিরাপদাঙ্কিতং ভজামহে॥ **5**॥

॥ ইতি শ্রীৱেঙ্কটেশতূণকং সমাপ্তম্॥